# अथसिद्धांतपद्धतिप्रारंभः

सि०प्र०

श्रीगणेशायनमः श्रीगुरुभ्योनमः आदिनाथंनमस्कृत्यशक्तियुक्तंजगद्गु
१ रुं वक्ष्येगोरक्षनाथोहंसिद्धसिद्धांतपद्धतिं १ नास्तिसत्यविचारोस्मिन्नुत्प
त्ति .।श्चांडपिंड्योः तथापिलोकवृत्यार्थंवक्ष्येसत्संप्रदायतः २ सापिंडो
त्पत्त्यादिसिद्धमतेसाभ्यकृप्रसिद्धा पिंडोत्पत्तिः पिंडविचारः पिंडसं
स्थितिः पिंडाधारःपिंडयदर्सैमरसभावःनित्यपिंडावधूता ३ यदानास्तिस्व
यंकर्तृकारणंचकुलाकुलं अव्यक्तंतत्परंब्रह्मंअनामाविद्यतेनदा ४ अ
नामेतिस्वयमनादिसिद्धं एकमेवअनामादिनिधनंसिद्धसिद्धांतप्रसिद्धं॥
तस्येच्छामात्रेणधर्मधर्मिणीनिजशक्तिःप्रसिद्धा तस्योन्मुखमात्रेणापराशा
नं१ क्तिरुत्थिता तस्याःस्पंदमात्रेणापराशक्तिरुत्थिता ततोहंतार्धमात्रेणसू

DR. BHAU DAJI MEMORIAL



क्ष्मशक्तिरुत्पन्ना तत्तोवेदनशीलाकुंडलिनीशक्तिरुत्थिच्छता नित्यता
निरंजनता निष्पंदता निराभासता निरुत्पन्नता इतिपंचगुणानिजश
क्तिः आस्तिता अप्रमेयता अभिन्नता अनंतरता अव्यक्तता इतिपंच
गुणापराशक्तिः स्फुरता स्फुटता स्फारता स्फोटता स्फुर्तिता इतिपंच
गुणाऽपराशक्तिः निरशता निरंतरता निश्चलता निश्चयता निर्विकि
ल्पता इतिपंचगुणासूक्ष्मशक्तिः पूर्णता प्रतिबिंबता अबलता प्रेच
लता प्रत्यक्षुरुता इतिपंचगुणाकुंडलिनीशक्तिः एवंशक्तितत्वेपंचपंच
गुणयोगात्परंपिंडोत्पत्तिः उक्तंच निजापरापरासूक्ष्माकुंडलीतासुपंच
धा शक्तिचक्रक्रमेणोत्थाजातःपिंडःपरःशिवः २ अपरंपरं परमपदं॥
शून्यं निरंजनं परमात्मादति अपरंपरं स्फुरतामात्रमुत्पन्नं परमपद

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

भावनामात्रमुत्पन्नं शून्यं स्वसत्तामात्रमुत्पन्नं निरंजनं स्वसाक्षात्कार
मुत्पन्नं परमात्मनः परमात्मतामुत्पन्नः अकलंकत्वं अनुपमत्वं अ
पारत्वं अमूर्तत्वं अनुदयत्वमितिपंचगुणात्मपरंपरं निष्कलं अणु
तरत्वं अचलत्वं असंख्यत्वं अपारत्वमितिपंचगुणपरमपद लीनता॥
पूर्णता उन्मनी लोलता मूर्छता इतिपंचगुणशून्य सत्यत्वं सहजत्वं
समरसत्वं सावधानत्वं सर्वगुणतत्वमितिपंचगुणनिरंजने अक्षयत्वं
अर्घत्वं अछेद्यत्वं अदाह्यत्वं अविनाशत्वमितिपंचगुणपरमात्मा
इत्यनाद्यपिंडस्यपंचतत्वपंचविंशतिगुणाः उक्तंच अपरंपरंपरमपदं
शून्यनिरंजनंपरमात्मनःपंचभिरेतैः सगुणैरनादिपिंडैःसमुत्पन्नः अ
नाद्यात्परमानंदः परमानंदात्प्रबोधः प्रबोधाच्चिदुदयः चिदुदयात्र







काशः अकाशात्सोहंभावः स्पंदः हर्षः उत्साहः निष्पंदः नित्य
सुखत्वमितिपंचगुणःपरमानंदः उदयः उल्हासः अवभासः विकाशः
प्रभाइतिपंचगुणःप्रबोधः सद्भावः विचारः कर्तृत्वं ज्ञातृत्वं स्वतंत्र
त्वमितिपंचगुणश्चिदुदयः निर्विकारत्वं निर्विकल्पत्वं समता विश्रांति
रितिपंचगुणःअकाशः अहंता अखंडैश्वर्यं स्वात्मता विश्वानुभवसाम
र्थ्यं सर्वज्ञत्वमितिपंचगुणःसोहंभावः इत्याद्यपिंडस्यपंचतत्वपंचविंशति
गुणाः उक्तंच परमानंदः प्रबोधःचिदुदयः चित्प्रकाशसोहंमित्यतः॥
आद्यपिंडोमहातत्वगुणयुक्तसमुत्थितः आद्यात्माहाकाशः महाका
शान्महावायुः महावायोर्महत्तेजः महातेजोमहासलिलं महासलि
लान्महापृथिवी अवकाशः अछिद्रत्वं अस्पृशत्वं नीलवर्णत्वं

शब्दलमितिपञ्चगुणोमहाकाशः संचारः चालनं स्पर्शनं शोषणं धू
म्रवर्णत्वमितिपंचगुणोमहावायुः दाहकत्वं पाचकत्वं उष्णत्वं प्रकाश
त्वं रक्तवर्णत्वमितिपंचगुणंमहातेजः प्रवाहः आप्यायनं द्रवः रसः
श्वेतवर्णत्वमितिपंचगुणंमहासलिलं स्थूलता नानाकारता काठि
ण्यं गंधः पीतवर्णत्वमितिपंचगुणामहापृथिवी इतिमहासाकारपि
ण्डस्यपंचतत्वपंचविंशतिगुणाः सदाशिवः शिवोद्भवः भैरवो
श्रीकंठः श्रीकंठात्सदाशिवः सदाशिवादीश्वरः ईश्वराद्रुद्रः रुद्राद्वि
ष्णुः विष्णोर्ब्रह्मा इतिमहासाकारपिंडस्यमूर्त्यष्टकं तत्तद्वक्षणः सो
वकाशादवलोकननरनारीरूपप्रकृतिपिंडमुत्पन्नं तच्चपंचात्मकं
शरीरं अस्थिमांसत्वक्रोमाणिनाडीपंचगुणाभूमिः लालामूत्रशुक्र

राम ३ नि

---

शोणितंस्वेदइतिपंचगुणमापः क्षुधातृषानिद्राकांतिआलस्यमितिपंचगु
णंतेजः धावनंवमनंप्रासारणमाकुंचननिरोधनमितिपंचगुणोमहावा
युः रागोद्वेषाभयंलज्जामोहमितिपंचगुणमहाकाशः इतिपंचविंशति
गुणानांप्रकृतिपिंडः मनोबुद्धिर्हंकारश्चित्तश्चैतन्यंइत्यंतःकरणपंचकं॥
संकल्पविकल्पःमूर्छाजडतामननमितिपंचगुणंमनः विवेकः वैराग्यं शा
न्तिः संतोषः क्षमा इतिपंचगुणबुद्धिः अभिमानंमदोयंममसुरवंदुःखं
तिपंचगुणोहंकारः मतिर्धृतिःस्मृतिःत्यागःस्वीकारःइतिपंचगुणंचित्तं वि
मर्शः शीलनं धैर्यं चिंतनं निस्पृहत्वमितिपंचगुणंचैतन्यं एवमंतःकरण
गुणाः सत्वंरजस्तमःकालजीवइतिकुलपंचकं दयाधर्मः कृपा भक्तिः॥
श्रद्धा इतिपंचगुणंसत्वं दानंभोगश्रृंगारःवस्तुगृहणंस्वार्थमितिपंचगुणं

४२

मम ५ मम ५

सि०प्र० ४ रजः विषादःशोकःकलहःवधःबंधनमितिपंचगुणंतमः कलनाकत्वना
भ्रांतिः प्रमादः अनर्थइतिपंचगुणाःकालः जाग्रत्स्वप्नसुषुप्तितुर्य
तुर्यातीतमितिपंचावस्थागुणोजीवः इच्छाक्रियामायाप्रकृतिःवाक्इ
तिव्यक्तिश्चक्तिपंचकं उन्मादःवासनावांछाचिंताचेष्टाइतिपंच इच्छा॥
स्मरणंउद्योगः कार्यनिश्चयःस्वकुलाचारमितिपंचगुणाक्रिया मदःमा
त्सर्यदंभःक्षत्रिमलंभासत्यमितिपंचगुणमाया आशातृषास्पृहाकांक्षा
मिथ्याइतिपंचगुणाप्रकृतिः परापश्यंतिमध्यमावैखरीमातृकाइति
पंचगुणावाक् इतिव्यक्तिश्चक्तिपंचविंशतिगुणाः कूर्मकामःचंद्रसू
र्यः अग्निरितिप्रत्यक्षंकरणपंचक शुभंअशुभंयशःकीर्तिः अदृष्ट
फलसाधनमितिपंचगुणंकर्मइतिप्रीतिः क्रीडाकामनाअनुरताइति

---

१ श्लो पंचगुणःकामः उल्लोलाकल्पोलिनीउच्चलंतीउन्मादिनीतरंगिणीशोषिणी
लंपटाप्रवृत्तिःलहरीकल्लोलालिलिहानाप्रसरंतीप्रवाहसौम्याप्रसन्नाप्रबं
धि एवंचंद्रस्यषोडशकलाः सप्तदशकलानिवृत्तिः साऽमृतकला तृपि
नीग्रासकाउग्राआकुंचनीशोषिणीप्रबोधिनीस्माराआकर्षिणीतुष्टिवर्धिनी
ऊर्मिरेखाकिरणागतिप्रभावतीतिद्वादशकलासूर्यस्य त्रयोदशीस्वप्रका
शतानिजकला दाहिकाराजिकाज्वालिनीविस्फुलिंगिनीप्रचंडापाचकारो
द्रीदाहकारागिणीतीक्ष्णावतीत्यग्नेर्दशकलाः एकादशीकलाज्योतिः इति
प्रत्यक्षगुणकलासमूहः अथनाडीनांदशद्वाराणि इडापिंगलानासाद्वा
रयोर्वहतः सुषुम्नातालुमार्गेणब्रह्मरंध्रंवहति सरस्वतीमुखद्वारेवहति
पूषाऽलंबुषाचक्षुद्वारयोर्वहतिः गांधारीहस्तिनीजिह्वाकाकर्णद्वारयो

वहतः कुहूगुदद्वारेवहति शंखिनीलिंगद्वारेवहति सादंडमार्गेणब्रह्मरं
ध्रपर्यंतंवहति एवंदशद्वारेषुवर्त्तति अन्यासर्वनाड्योःरोमकूपेषुवर्त्तति
अथदशवायवः हृदयेप्राणवायुः उच्छासनिश्वासकारकोदीपकः पाचक
श्च गुदेत्वपानवायुःरेचकःकुंभकश्च नाभौसमानवायुःदीपकःपाचकश्च
कंठेव्यानवायुःसर्वनाडीशोषणाप्यायनकारकश्च नागवायुःसर्वांगव्याप
कःमोचकश्चालकश्च कूर्मवायुश्चक्षुरून्मेषकारकश्च ककलउद्गारकःक्षु
त्कारकश्च देवदत्तोमुखेजृंभकः धनंजयोनादघोषकः इतिदशवायुरक्तो
कनेनपिंडोत्पत्तिः नरनारीरूपं अथगर्भोत्पत्तिः नरनारीसंयो
गेऋतुकालरजोबिंदुयोर्गेजीवः प्रथमदिनेकललंभवति सप्तरात्रेबुद्बुदाकृ
तिर्भवति अर्धमासेगोलाकारंभवति मासमात्रेकठिणंभवति मासद्वयेशि

१स

राम ५

---

रोभवति तृतीयमासेहस्तपादादिकंभवति चतुर्थेमासिचक्षुकर्णादिनासि
कामुखमेढ्रगुदंभवति पंचमेमासिपृष्ठोदरंभवति षष्ठेमासिनखकेशा
दिकंभवति सप्तमेसर्वचेतनसंयुक्तोभवति अष्टमेसर्वलक्षणसंयुक्तोभव
ति नवमेसत्यज्ञानगर्भसंयुक्तोभवति दशमेमासियोनिसंस्पर्शादज्ञानी
बालकोभवति शुक्राधिकेपुरुषः रक्ताधिकेकन्याका समशुक्रारक्ताभ्यां
नपुंसकः परस्परंस्त्रीपुरुषचिंताव्याकुलत्वांदंधःकुब्जःवामनः पंगुः॥
अंगहीनाश्चभवंति परस्परंरतिकालेअंगनिपीडनंकरणंगुणेशुक्रंद्विस्त्री
वीरंपतितंनद्वितीयबालकोभवति सार्धपलत्रयशुक्रंविंशतिपलरक्तंदा
दशपलंमेदः दशपलंमज्जाशतपलंमांसदशपलंपित्तंविंशतिपलंश्लेष्म

तद्दृष्टांतस्यात् शतत्रयंअस्थिनी अस्थिमात्रंसंधायः सार्धत्रयकोटीरो
मकूपाणिपितृमात्रवीर्यंभवति वातपित्तश्लेष्मधातुत्रयदशधातुमयंशरी
रं इतिगर्भोत्पत्तिपिंडोत्पत्तिः इतिगोरक्षनाथस्यतौसिद्धिसिद्धांतपद्ध
तौपिंडोत्पत्तिर्नामप्रथमोपदेशः अथपिंडविचारउच्यते पिंडेनवच
क्राणि आधारब्रह्मचक्रंत्रिरावर्त्तंभगमंडलाकारंतत्रबीजंक्लींमूलकंदः
तत्रशक्तिंपावकाकारंध्यायेत् तत्रैवकामरूपंपीठंसर्वकामफलप्रदंभव
ति द्वितीयंस्वाधिष्ठानचक्रंतन्मध्येपश्चिमाभिमुखंलिंगंप्रवालांकुरस
दृशंध्यायेत् तत्रैवउड्डीयाणपीठंजगदाकर्षणंभवति तृतीयंमणिपूर
चक्रंपद्मावर्त्तंसर्पवत्कुटिलाकारंतन्मध्येकुंडलिनिशक्तिंबालार्ककोटि

DR. BHAU DAJI MEMORIAL



---

संन्निभांतत्रध्यायेत् सामध्यात्शक्तिः सर्वसिद्धिदाभवति चतुर्थंहृदयाधा
रंअष्टदलकमलमधोमुखंतन्मध्येकर्णिकायांत्रिकोणंध्यायेत् सएवा
पिहंसकलसर्वेंद्रियवन्नयंभवति पंचमंकंठचक्रंचतुरंगुलंतत्रवामेइडाचंद्र
नाडीदक्षिणेपिंगलासूर्यनाडीतन्मध्येसुषुम्नाध्यायेत् सएवअनाहतकलो
अनाहतसिद्धिर्भवति षष्ठंतालुचक्रंतत्रअमृतधाराप्रवाहःघटिकामूलर
ध्रंराजरंतांशंखिनीविवरंदशमद्वारंतत्रशून्यंध्यायेत् चित्तलयोभवति सप्त
मंभ्रूचक्रमध्यमंअंगुष्टमात्रंतत्रज्ञाननेत्रंदीपशिखाकारंध्यायेत् वाचा
सिद्धिर्भवति अष्टमंब्रह्मरंध्रंनिर्वाणचक्रंतत्रसूचिकाग्रमध्येधूम्रशिखारं
ध्यायेत् तत्रैवज्ञालंधरपीठंमोक्षप्रदंभवति नवमंआकाशचक्रंषोडशद
लकमलंमूर्ध्वमुखंतन्मध्येकर्णिकायांत्रिकुराकारंतत्रऊर्ध्वशक्तिंतांपरमशून्यं

ध्यायेत् तत्रैवपूर्णगिरिपीठंसर्वेच्छासिद्धिर्भवति इतिनवमचक्रविचारः अ
थषोडषाधारः तत्रप्रथमंपादांगुष्ठाधारंतत्राग्नितातेजोमयंध्यायेत् दृष्टि
स्थिराभवति द्वितीयंमूलाधारसूत्रंस्ववामपार्ष्णीननिपीडयस्थातव्यंअग्नि
दीपनंभवति तृतीयंगुदाधारंविकाशसंकोचनिरोकुंचेत् अपानवायुस्थि
रोभवति चतुर्थमिंद्रधारंलिंगसंकोचनेनब्रह्मग्रंथित्रयंभित्वाभ्रमरगुहा
यांविश्राम्यतत्रर्ध्वमुखेबिंदुरत्नंभवति एषावज्रोलितिप्रसिद्धा पञ्च
मेउड्डीयाणधारयोबंधनान्मूलमूत्रसंकोचनंभवति षष्ठनाभ्याधारेऽकाल
मेघचित्तिन्नोच्चारितनादलयोभवति सप्तमेहृदयाधारेप्राणान्निरोधंकृत्वा
ध्यायेत् कमलविकाशंभवति अष्टमेकंठाधारेकंठमूलंचुबुकेननिरो
धयेत् इडापिंगलयोर्वायुस्थिरोभवति नवमंघंटिकाधारेजिह्वाग्रंधार

राम ७

---

येत् अमृतकलास्रवति दशमेतालुंतर्गमेलंबिकाचालनदोहनाभ्यांदी
र्घांहृत्वाविपरीतेनप्रवेशयेत् काष्ठोभवति एकादशमथोजिह्वाधारंतत्र
जिह्वाग्राग्रंधारयेत् सर्वरोगनाशोभवति शीतलतायाति द्वादशभ्रूमध्या
धारंतत्रचंद्रमंडलंध्यायेत्शीतलतायाति त्रयोदशंनासाधारंतस्याग्रंलक्ष
येत् मनस्थिरोभवति चतुर्दशनासामूलंकपाधारंतत्रदृष्टिंधारयेत् ष
ण्मासाज्ज्योतिःपुंजंपश्यंति पंचदशंललाटाधारंतत्रज्योतिःपुंजंपश्येत्
तेजस्वीभवति अवशिष्टब्रह्मरंध्रेआकाशचक्रंतत्रश्रीगुरूत्वरणांबुजयुग्म
सरावलोकयेत् आकाशवत्पूर्णोभवति इतिषोडषाधारः अथलक्ष
त्रयंकथ्यते मूलकंदादंडलग्नांब्रह्मनाडीश्वेतवर्णाब्रह्मरंध्रपर्यंतंगतांस्म

रेत् तस्यमध्येकमलतंतुनिभांविद्युल्लोटिप्रभांऊध्वगामिनींत्वामूर्ति
मनसालक्षयेत् सर्वसिद्धिप्रदाभवति अथवालल्लाटोर्ध्वकोल्लारमंट
पेस्फुरतारकारंलक्षयेत् अथवाभ्रमरगुहामध्येज्वालारक्तभ्रमराकारंलक्ष
येत् चक्षुर्मध्येनीलज्योतिरूपंपुतल्याकारंलक्षयेत् इत्यनेकविधंम
तंलक्षं अथबहिर्लक्षंकथ्यते नासाग्राद्बहिरंगुलचतुष्टयेनीलज्योतिसं
काशंलक्षयेत् अथवानासाग्रात्षडंगुलेर[illegible]अधोवायुतत्त्वंधू
म्रवर्णंलक्षयेत् अथवाअंगुष्ठांगुलेआरक्ततेजस्तंलक्षयेत् अथवादशांगुले राम
कल्लोलवदापरक्ततंलक्षयेत् अथवानासाग्रद्वादशांगुलेपीतवर्णंपार्थिवतत्त्वं
लक्षयेत् अथवाआकाशंमुखंदृष्ट्वालक्षयेत् किरणाकुलितंपश्यति एवंनि

---

र्मलीकरणं अथवाऊर्ध्वदृष्टांतरालंलक्षयेत् ज्योतिर्मुखानिपश्यति अथ
वायत्रतत्रआकाशंलक्षयेत् आकाशसदृशंचित्तंभवति मोक्षप्रदंभवति
अथवादृष्टांतप्रकांचनसंनिभांभूमिंलक्षयेत् दृष्टिस्थिराभवति इत्यनेक
विधंबहिर्लक्षंकथ्यते अथमध्यलक्षंकथ्यते श्वेतवर्णंरक्तवर्णंवाकृष्णवर्णंवा
अग्निशिखाकारंवाज्योतिरूपंविद्युदाकारंवासूर्यमंडलाकारंवाअर्धचंद्रा
कारंवायत्रेच्छस्वपिंडमात्रंस्थानविवर्जितंमनसालक्षयेत् इत्यनेकविधंम
ध्यलक्ष अथव्योमपंचकंलक्षयेत् आकाशं पराकाशं महाकाशं तताका
शं सूर्यकाशमितिव्योमपंचकं बाह्यांतरेअत्यंतनिर्मलंनिराकारमाकाशंल
क्षयेत् अथवाबाह्याभ्यंतरेअत्यंतांधकारनिभंपराकाशमवलोकयेत् वा

त्याभ्यंतरेकालानिलसंकाशंमहाकाशमवलोकयेत् बाह्याभ्यंतरेनिजतत्व
स्वरूपंतत्वाकाशमवलोकयेत् अथवाबाह्यांतरसूर्यकोटिनिभंसूर्याकाशम
वलोकयेत् एवंव्योमपंचकावलोकनेनव्योमसदृशोभवति उक्तंच नव
चक्रंकलाधारंत्रिलक्षंव्योमपंचकं सम्यगेतन्नजानातिसयोगीनामधारकः १
अथाष्टांगयोगः यमइति उपशमः सर्वेंद्रियजयः आहारनिद्राश्लीत
वातातपजपश्चयवेशैनैःशनैःसाधयेत् नियमनइति मनोवृत्तिनांनिय
मनमिति एकांतवासः निःसंगता औदासिन्यं यथाप्राप्तिः संतुष्टीः
वैराग्यं गुरुवचनावस्थैर्यं इतिनियमलक्षणं आसनमिति सदास
स्वरूपेसमासनता स्वस्तिकासनं पद्मासनं सिद्धासनं एतेषांम



ध्येयश्चेष्टमेकंविधायसावधानेनस्थातव्यमित्यासनलक्षणं॥ प्राणायाममिति॥
प्राणस्यस्थिरता॥रेचकपूरककुंभकसघट्टकरणानिचत्वारप्राणायामलक्षणं॥
प्रत्याहारलक्षणं॥चैतन्यतरंगाणांप्रत्याहारलक्षणं॥यथानानाविकारग्र
सनंउत्पन्नविकारस्यापिनिर्मितिः॥ ॥इतिप्रत्याहारलक्षणं॥अथध्या
नं॥आस्तिकश्चनपरमात्मा द्वैतस्यभावःसएवात्मेतियथायद्यस्फुरति
तत्तत्स्वरूपमेवनिर्भावयेत्॥सर्वंभूतेषुसमदृष्टिश्च॥इतिध्यानलक्षणं॥
धारणेति॥सबाह्याभ्यंतरेएकमेवनिजतत्वस्वरूपांग्वमंतःकरणेनसाध
येत्॥यथायद्युत्पद्यतेतत्तन्निराकारंध्यायेत्॥स्वात्मानंनिर्वातदीप
मिवसंधापयेत्॥इतिधारणालक्षणं॥अथसमाधिः॥सर्वतत्वानांसमा

वस्थानिरुद्धमस्वमनायासस्थितिमत्वमितिसमाधिलक्षणं॥ ॥इतिगो
रक्षनाथहृतोसिद्धसिद्धांतपद्धतौपिंडक्षीरोनामद्वितीयोपदेशः॥ ॥
अथपिंडासंवितिरुच्यते॥ ॥पिंडमध्येश्वराश्चरंजानातिसयोगीपिंडसं
वेत्तिभवति॥ कूर्मः पादतलेवसंति॥पातालंपादांगुष्ठे॥तलातलंअंगुष्ठाग्रे॥
महातलंपादपृष्ठे॥रसातलंगुल्फे॥सुतलंजंघायां॥वितलंजान्वोः॥अतल
मूरुवोः॥एवंसप्तपातालंरुद्रोदेवताधिपत्यंतिष्ठति॥पिंडमध्येत्रोधरूपीभा
वः॥सएवकालाग्निरुद्रः॥भूर्लोकंगुह्यस्थाने॥भुवर्लोकंगुह्यस्थाने॥सु
वर्लोकंनाभिस्थाने॥एवंलोकत्रयेइंद्रोदेवतापिंडमध्येसवीर्यनिया
मकः॥सएवेंद्रः॥दंडांकुरमहर्लोकः॥दंडकुहरेजनोलोकः॥दंडनालेत



पोलोकः॥मूलकमलेसत्यलोकः॥एवंलोकत्रयातीतेयब्रह्मादेवतापिंडमध्येअनेकभा
नाभिमानस्वरूपीतिष्ठति॥विष्णुलोकः॥कुक्षौतिष्ठति॥तत्रविष्णुदेवतापिंडम
ध्येअनेकव्यापकोभवति॥हृदयेरुद्रलोकः॥तत्ररुद्रोदेवतापिंडमध्येउग्रस्वरूपी
तिष्ठति॥वक्षस्थलेईश्वरलोकः॥तत्रेश्वरोदेवतात्मिस्वरूपीतिष्ठति॥शंख
मध्येनलिनीस्थानेअकुलेशलोकः॥तत्रअकुलेश्वरोदेवतापिंडमध्येनिरभि
मानावस्थातिष्ठति॥ब्रह्मरंध्रेब्रह्मलोकः॥तत्रपरमात्मादेवता॥पिंडमध्येपरि
पूर्णदशातिष्ठति॥ऊर्ध्वकमलेपरापरलोकः॥तत्रपरमेश्वरोदेवतापिंडमध्येअ
स्तावस्थापरापरभावतिष्ठति॥त्रिकूटस्थानेशक्तिलोकः॥तत्रपराशक्तिर्दे
वतासर्वासांसर्वकर्तृत्वावस्थातिष्ठति॥एवंपिंडमध्येसप्तपातालसहितैःएकवि

शांतिब्रह्माऽऽस्थानविचारः॥सदाचारतत्रब्राह्मणावसंति॥शौर्यैक्षत्रियः॥व्य
वसायेवैश्यः॥सेवायांशूद्रः॥चतुषष्टिकलास्वपिचतुःषष्टिवर्णः॥अथसप्तस
मुद्राःसप्तद्वीपाःकथ्यंते॥मज्जायांजंबुद्वीपः॥अस्थिषुशाल्मलिद्वीपः॥शिरासुस
प्तद्वीपः॥त्वक्सुक्रौंचद्वीपः॥रामसुगोमयद्वीपः॥नखेषुश्वेतद्वीपः॥अस्थीनि
पुष्करद्वीपः॥एवंसप्तद्वीपः॥मूत्रेक्षारसमुद्रः॥लालायांक्षीरसमुद्रः॥कफेदधि
समुद्रः॥मेदसिघृतसमुद्रः॥वसायांमधुसमुद्रः॥रक्तेऽइक्षुरससमुद्रः॥शुक्रेअ
मृतसमुद्रः॥एवंसप्तसमुद्राः॥नवखंडानिनवद्वारेषुवसंति॥भरतखंडं॥काश्मी
रखंडं॥कर्पूरखंडं॥श्रीखंडं॥शंखखंडं॥एकपादखंडं॥गांधारखंडं॥केवर्तक
खंडं॥महामेरुखंडं॥एवंनवखंडानि॥मेरुपर्वतोमेरुखंडेवसति॥कैलासब्रह्म

DR BHAU DAJI MEMORIAL



कपोरेवसंति॥हिमालयः पृष्ठे॥मलयोवामकंधरे॥मंदारोदक्षिणकंधरे॥
विंध्योदक्षिणकर्णे॥मैनाकःवामकर्णे॥श्रीपर्वतोललाटे॥एवमष्टपर्वताः॥ कुल२
अन्येऽपपर्वताः॥सर्वेगुल्मिषुवसंति॥पीतसा॥यमुना॥गंगा॥चंद्रभागा॥
सरस्वती॥पिपासा॥शतरुद्रा॥श्रीसत्री॥नर्मदा॥एवंनवनद्योनवनाडिषुव
संति॥अन्याऽपनद्याःकुल्याोपकुल्याःद्विसप्ततिसहस्रनाडिषुवसंति॥स
प्तविंशतिनक्षत्राणिद्वादशराशयः॥नवग्रहः पंचदशतिथयः एतेअंतर्बल्ये
द्विसप्ततिकोष्ठेषुवसंति॥अनेकतारामंडलेऊर्मिपुंजेवसंति॥त्रयस्त्रिंश
त्कोटिदेवताःबकुरामकूपेषुवसंति॥देवदानवयक्षराक्षसपिशाचभूत
प्रेताःअस्थिसंधिषुवसंति॥कुलनागावक्षसिवसंति॥अन्येसनकादिमुनि

सघ्राःकक्षरोमकूपयोवसंति॥अनेकपीठेपपीठिकारोमकूपेषुवसंति॥
अन्येउपपर्वताःउदरलोमसुवसंति॥गंधर्वकिंनरकिंपुरुषाअप्सरोगणाः
उदरेवसंति॥अन्याःखेचरीलीलामातरःशक्तयःउग्रदेवतावायुवेगवसं
ति॥अनेकमेघाःअश्रुपातेवसंति॥अनेकतीर्थानिमर्मस्थानेवसंति॥
अनेकसिद्धाःमतिप्रकाशेवसंति॥चंद्रसूर्यौनेत्रद्वयेवसतः॥अनेकवृक्ष
लताःगुल्मतृणानिजघारोमकूपेवसंति॥अनेकक्रिमिकीटकपतंगाः
पुरीषेवसंति॥यत्सुखंतत्स्वर्गः॥यदुःखंतन्नरकः॥यत्कर्मतद्बंधनं॥य
न्निर्विकल्पःतन्मुक्तिः॥स्वस्वरूपदशायानिद्रादोस्वात्मजागरस्यात्म
यति॥एवंसर्वदेहेषुविश्वरूपःपरमेश्वरः॥परमात्माअखंडरूपोवि



---

घटेघटेचित्स्वरूपेतिष्ठति॥ ॥इतिपिंडसंवितिः॥ ॥इतिगो॰॥नौपिंडसं
वितिर्नामतृतियोपदेशः॥ ॥अथपिंडाधारःकथ्यते॥अस्तिकाचिदपर
परासंवित्स्वरूपासर्वपिंडाधारत्वेननित्यप्रबुद्धानिजशक्तिःप्रसिद्धा॥का
र्यकारणकर्तृणामुच्छानदशाकुरान्मूलननकर्तारंकरोतिनित्यतयाधार
शक्तिरितिकथ्यते॥अत्यंतनिजप्रकाशस्वसंवेद्यानुभवैकगम्या
मानशास्त्रलौकिकसाक्षात्कारसाक्षिणीसापरसंविद्रूपाणीशक्तिर्गी
यते॥सैवशक्तिर्यदासहजेनस्वस्मिन्नुन्मीलिन्यानिरुच्छानदशायावर्तते॥
तदाशिवःसैवभवति॥अतएवकुलाकुलस्वरूपासमरस्यनिजभूमिका
निगद्यते॥कुलमिति॥परामासंतत्वादहंतास्फुरताकुलस्वरूपेणसैवपं

यथाविश्वस्याधारत्वेनतिष्ठति॥अतएवपरापरानिरंशासावंशासाकान्त्रका
शस्वरूपायासापराऽनादिसंसिद्धपरमाद्वैतापरनेकमेवाक्षितियाऽंगिकार
करोतिसासताऽनादिनिधनाप्रमेयःस्वभावकिरणानंदास्म्यहमिति॥अहं
सूत्रनलायासापरा॥अहंतास्वानुभवविच्चमत्कारनिरुद्यानंदशाप्रस्फुरी
करोतियासांस्फुरत्तानित्यशुद्धबुद्धस्वरूपस्यस्वयंप्रकाशत्वमाकलयंती ल५
तियासापराकालत्युच्यते॥अकुलमिति॥जातिवर्णगोत्राद्यखिलनिमि
त्तलेनेकमेवाक्षितीतियाप्रसिद्धं॥यथाचोक्तंउमामहेश्वरसंवादेनिरुत्तरे॥
अनन्यत्वादरवउत्वाद्व्यत्वादनन्याश्रयत्वात्॥निर्धर्मित्वात्अनामत्वाद राम
कुलस्यान्निरुत्तरमिति॥एवंकुलाकुलंसामरस्यप्रकाशभूमिकास्फुरीक १३॥

---

करणेएकैवमर्थयासाअपरंपराशक्तिरेवावशिष्यते॥अपरंपरंनिखिलविश्व
प्रपंचजालंपरतत्वंसंपादयतिएकीकरोतीत्यपरंपराशक्तिः॥शक्तिरात्मावे
तीप्रसिद्धं॥उक्तंचतंत्रालोकेछंदे॥अकुलंकुलमधीतिकुलंवाकुलमिच्छति॥
जलबुद्बुदवन्यायादेकांकारपरःशिवः॥अतएकाकारएवअनंतशक्तिमान्नि
जानंदविश्रांतोपिनानाकारत्वेनविलसन्स्वप्रतिष्ठास्वयमेवभजतीत्यवहा
रः॥उक्तंचप्रत्यभिज्ञायां॥अत्युप्तशक्तिमान्नित्यंसर्वाकारतयास्फुरन्॥पुनस्त्व
नैवरूपेणएकएवावशिष्यते॥अतएवपरमकारणंपरमेश्वरःपरात्परःशिवःस्व
स्वरूपतयासर्वतोमुखः॥सर्वाकारतयास्फुरतितंशक्तीतित्यःशक्तिमान्॥उ
क्तंचवामकेश्वरतंत्रे॥शिवोपिशक्तिरहितःशाक्तःकर्तुनकिंचन॥स्वशक्त्यास

हिताः सोपिसर्वभासकोभवत्॥अतएवआनंदशक्तिमान्परमेश्वरः संवित्स्वरूपी
विश्वमयोभवतीप्रसिद्धं॥सिद्धानांचपरापरस्वरूपाकुंडलिनीवर्तते॥अतस्तेपिउ
सिद्धाः॥साकुंडलिप्रबुद्धाअप्रबुद्धेतिद्विविधा॥अप्रबुद्धेनितत्तपिंडचेतनस्वरू
पास्वभावेनानाचिंताव्यापारोद्यमप्रपंचरूपाकुंडलिस्वभावाकुंडलिनीख्याता॥
सैवयोगिनांतत्तद्विलसितविकाराणांनिवारणोद्यमःस्वरूपाकुंडलिनीऊर्ध्व
गामिनीसुप्रसिद्धाभवति॥ऊर्ध्वगामिनि॥सर्वतत्तान्यपिस्वस्वरूपमेवेत्यूर्ध्ववर्त
ते॥अतएवसाविमर्शरूपिणीयोगिनांस्वस्वरूपमवगछतीतिसुप्रसिद्धा॥
तथाचोक्तवस्कुले॥मध्यशक्तिप्रबोधेनअधश्शक्तिर्निकुंचनात्॥ऊर्ध्वशक्ति
निपातेनप्राप्येपरमंपदं॥एकैवसामध्याधोधःप्रभेदेनत्रिधाभिन्नाशक्तिरि



धीयते॥बाह्येंद्रियव्यापारनानाचिंतामायासासैवाधःशक्तिरित्युच्यते॥अत
एवयेयोगिनस्तत्स्याःआकुंचनंतासस्याःआकुंचनंमूलाधारबंधनात्सिद्ध
स्यात्॥यस्माच्चराचरंजगदिदंचिदचिदात्मकंप्रभवति॥तदेवमूलाधारसंवि
न्प्रसारंप्रसिद्धं॥उक्तंचशिवानंदाचार्यैःसर्वशक्त्याशक्तिप्रसरसंकोचाभ्यांज
गत्सृष्टिसंहृतिश्चाभवत्यवनसंदहः॥तस्मात्तांमूलमित्युच्यते॥अतःप्राये
णसर्वेसिद्धामूलाधारताभवति॥तरंगितःस्वभावजीवात्मानंवृथाभ्रमं
तमपिस्वप्रकाशमध्येस्वस्वरूपतयासराधारितुंसमर्थयामध्याशक्तिः॥
कुंडलिनीतिगीयते॥स्थूलसूक्ष्मरूपेणमहासिद्धानांप्रतियत्नेतिनि
श्चयः॥स्थूलेति॥निखिलोग्राह्याधारायाश्चस्वरूपापिपदार्थांतरेभ्याप्य

णाविद्रूपावर्त्ततेसाकुंडलिनीसाकारस्थूलापुनस्त्रियेमवस्वप्नसारचातुर्यन
यावर्त्तमानायोगिनंपरमानंदतयाकुंडलिनीयानिश्चयभूतावर्त्ततेसासूक्ष्मा
निराकाराप्रबुद्धामहासिद्धानामतत्प्रसिद्ध॥ उक्तंचतत्वसारे॥ सृष्टिकुंडलि
नीख्यातावृथाभावगतातुसा॥एकधास्थूलरूपावलोकानाप्रव्ययात्मिका॥
अपरासर्वगासूक्ष्माव्याप्तिव्यापकवर्जिता॥तस्याभेदंनजानाति
मोहिताप्रत्ययेनतु॥तस्मात्सूक्ष्मापरासंवित्स्वरूपामध्यशक्तिः॥कुंडलिनी
योगिभिर्देहसिध्यर्थंसद्गुरुमुखाज्ज्ञात्वास्वस्वरूपदशायांप्रबोधिनीया॥अ
थऊर्ध्वशक्तिनिपातःकथ्यते॥सर्वेषांतत्वानामुपरिवर्तमानत्वान्निर्नामप
रमपदंयदऊर्ध्वप्रसिद्धं॥तस्याःस्वसंवेदननानासाक्षात्कारसूत्रनशक्ति



यासाऊर्ध्वशक्तिरभिधीयते॥तस्याःनिपातमिति॥स्वस्वरूपद्विधाभासानि
राभासः॥किंतुस्वस्वरूपाअखंडत्वेनभवति॥उक्तंच॥शिवस्याभ्यंतरःशक्तिः
शक्तिरभ्यंतरःशिवः॥अंतरंनैवजानीयाच्चंद्रचंद्रिकयोरिव॥अतऊर्ध्वशक्ति
निपातेनमहासिद्धयोगिभिःपरमानंदंप्राप्यतइतिसिद्धं॥बहुलतरलोलपरा
संविदेषाभासे २भजनचतुरावृहिनासंविदेव॥१॥किमुक्तंभवति॥पराप्र
विमर्शरूपिणीसंविन्नानाशक्तिरूपेणनिखिलपिंडाधारत्वेनवर्त्ततइतिसि
द्धांतः॥ ॥इतिगोरक्षनाथकृतौपिंडाधारोनामचतुर्थोपदेशः॥ ॥अथ
पिंडपदयोःसमरसकरणंकथ्यते॥महासिद्धयोगिभिःपूर्वक्रमेणपरंपं
डादिस्थपिंडांतंज्ञात्वापरमपदेसमरसंकुर्यात्॥परमपदमितिस्वसंवेद्यंअ



Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

त्यंतंभासाभासकमयं॥उक्तंचतत्संहितायां॥यत्रबुद्धिमनोनास्तितत्रंकिन्ना
पराकला॥उहापोहौनकर्त्तव्यौवाचातत्रकरातिकिं॥वाग्मिणागुरूणासम्यक्कृत्यं
तत्संदर्शयते॥तस्मादुक्तंशिवेनैवस्वसंवेद्यंपरंपदं॥२॥अतएवनानाविधचि
त्रैवातुर्यचर्चाविस्मयंगगुरूचरणत्वान्निरूपाधिकारत्वात्॥निर्णिक्तत्वात्॥
स्वसंवेद्ययेवपरमंपदंप्रसिद्धमितिसिद्धांतः॥गुरुरत्रसम्यक्सन्मार्गदर्शनश्री
लोभवति॥सन्मार्गोयोगमार्गः॥तदितरःपाषांडमार्गः॥तदुक्तंआदिनाथे
न॥योगमार्गेषुतंत्रेषुदीक्षितारत्नांश्चदूषकाः॥तेहिपाषांडिनःप्रोक्तातथा
तैःसहवासिनः॥यस्मिन्दीक्षितेसतितत्क्षणात्स्वसंवेद्यसाक्षात्कारःसमुत्प राम
द्यते॥ततेगुरूरेवात्रकारणमुच्यते॥तस्माद्गुरुकराक्षपातात्स्वसंवेद्यतया २६

चमहासिद्धयोगिभिःस्वकीयंपिंडनिरुत्थानानुभवेनप्राप्त्युपायःकथ्यते॥
महासिद्धयोगिनःस्वस्वरूपतनुसंधाननिजावशोभवति॥